

शुक्लयजुर्वेदीयषडङ्ग

रुद्राष्टाध्यायी

(मूल)

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई - ४.

अथ

शुक्लयजुर्वेदीयषडङ्गरुद्राष्टाध्यायी

प्रारभ्यते ।

संस्करण : जुन २०१९, संवत् २०७६

मूल्य : ५० रुपये मात्र

© सर्वाधिकार : प्रकाशक द्वारा सुरक्षित

मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers :
Khemraj Shrikrishnadass,
Prop: Shri Venkateshwar Press,
Khemraj Shrikrishnadass Marg, 7th Khetwadi.
Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s. Khemraj Shrikrishnadass
Proprietors Shri Venkateshwar Press, Mumbai - 400 004,
at their Shri Venkateshwar Press, 66 Hadapsar Industrial
Estate, Pune 411 013

॥ श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य । देशकालौ संकीर्त्य च । संकल्पः । अद्य पूर्वोच्चारितैवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममाऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षसिद्धिद्वारा सर्वव्याधिनिरासपूर्वकं सर्वाभीष्टसिद्ध्यर्थं श्रीभवानीशङ्करदेवताप्रीत्यर्थं च रुद्रैकादशिन्याभिषेकयुक्तं सकृदावर्तनाभिषेकयुक्तं वा अमुकद्रव्येण रुद्राभिषेकमहं करिष्ये । तदङ्गतया विहितान् शरीरशुद्ध्यर्थं लघुषडङ्गन्यासांश्च करिष्ये ॥ मनोजूतिरितिमन्त्रस्य बृहस्पतिर्ऋषिः । बृहती छन्दः । बृहस्पतिर्देवता । हृदयन्यासे जपे वि

नियोगः ॥ ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनो
रु. १ त्वरिष्टं यज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो ३
म्प्रतिष्ठ ॥ ॐ हृदयाय नमः ॥ १ ॥ अबोध्यग्निरितिमन्त्रस्य बुधग
विष्ठिरा ऋषिः। त्रिष्टुप् छन्दः। अग्निर्देवता। शिरोन्यासे जपे विनियो
गः ॥ ॐ अबोद्ध्यग्निः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्।
यह्वाऽइवप्प्रवयामुज्जिहानाꣳप्प्रभानवः सिस्त्रतेनाकमच्छ ॥ ॐ शिरसे
स्वाहा ॥ २ ॥ मूर्द्धानमितिमन्त्रस्य भरद्वाज ऋषिः। त्रिष्टुप् छन्दः।
अग्निर्देवता। शिखान्यासे जपे विनियोगः ॥ ॐ मूर्द्धानन्दिवोऽअरति

म्पृथिव्याद्वैश्वानुरमृतऽआजातमुग्निम् ॥ कुविँ सुम्म्राजुमातिँथिञ्जनां
नामुासन्नापात्रंञ्जनयन्तदेवाः ॥ ॐ शिखायै वषट् ॥ ३ ॥ मम्र्माणित
इतिमन्त्रस्य अप्रतिरथ ऋषिः। विराट् छन्दः। मम्र्माणि देवता। कवच
न्यासे जपे विनियोगः ॥ ॐ मम्र्माँणितेव्वर्म्मँणाच्छादयामिसोम
स्त्वाराजामृतेनानुवस्ताम् ॥ उुरोर्व्वरींयोव्वरुंणस्तेकृणोतुजयंन्तु
न्त्वानुदेवामंदन्तु ॥ ॐ कवचायहुम् ॥ ४ ॥ विश्वतश्चक्षुरितिमन्त्र
स्य विश्वकर्मा भौवन ऋषिः। त्रिष्टुप् छन्दः। विश्वकर्मा देवता। नेत्रन्या
से जपे विनियोगः ॥ ॐ व्विश्वतंश्चक्षुरुतव्विश्वतोंमुखोव्विश्वतोंबाहुरु

रु. २ ताव्विश्श्वतंस्पपात् ॥ सम्बाहुभ्भ्यान्धमंतिसम्पतंत्रैर्घ्यावाभूमींजुनयंन्देव

ऽएकंः ॥ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ मानस्तोक इतिमन्त्रस्य परमेष्ठी

ऋषिः । जगती छन्दः । एकरुद्रो देवता । अस्त्रन्यासे जपे विनियोगः

॥ ॐ मानंस्तोकेतनंयेमानऽआयुंषिमानोगोषुमानोऽअश्श्वेषुरीरिषः ॥

मानोंव्वीरान्नुद्रभामिनोंवधीर्हंविष्मंन्तःसदमित्त्वांहवामहे ॥ ॐ अस्त्रा

य फट् ॥ ६ ॥ ॥ इति लघुषडङ्गन्यासाः ॥ ॥ ७ ॥

॥ श्रीगणेशायनमः ॥ ॥ हरिः॑ ओ३म् ॥ माच्छन्दः॒ प्प्रमाच्छन्दः॒ प्प्रतिमा
च्छन्दो॑ऽअस्त्रीवयुश्छन्दः॒ पुङ्क्तिश्छन्दं॒ऽउष्णिकच्छन्दो॑बृहतीच्छन्दो॑नुष्टु
प्छन्दो॑व्विराट्छन्दो॑गायत्त्रीच्छन्द॑स्त्रिष्टुप्छन्दो॑जगतीच्छन्दः॑ ॥ १ ॥
पृथिवीच्छन्दो॒न्तरि॑क्षुञ्छन्दो॒द्यौश्छन्दु॒स्समाुञ्छन्दो॒नक्षंत्राणिच्छ
न्दो॒व्वाकच्छन्दो॒मनुश्छन्दः॒ कृषिश्छन्दो॒हिर॑ण्युञ्छन्दो॒गौश्छन्दो॒जाच्छ
न्दो॒श्वुश्छन्दः॑ ॥ २ ॥ गुणानान्त्वागुणप॑तिर्ठ॑हवामहेप्प्रियाणान्त्वा
प्प्रियप॑तिर्ठ॑हवामहेनिधीनान्त्वा॑निधिपतिर्ठ॑हवामहेव्वसोमम ॥ आह
मंजानिगर्भधमात्वमंजासिगर्भधम् ॥ ३ ॥ गायत्त्रीत्त्रिष्टुब्जग॑त्यनुष्टु

प्पुङ्क्त्यासुह ॥ बृहत्युष्णिहांककुप्सूचीभिः शम्म्यन्तुत्वा ॥ ४ ॥ द्वि
पदायाश्चचतुष्पदास्त्रिपदायाश्चषट्पदाः ॥ विच्छन्दायाश्चसच्छन्दाः
सूचीभिः शम्म्यन्तुत्वा ॥ ५ ॥ सहस्तोमाः सहच्छन्दसऽआवृतः सह
प्प्रमाऽऋषयः सप्तदैव्याः ॥ पूर्वेषाम्पन्थामनुदृश्यधीराऽअन्वालेभि
रेरथ्योनरश्मीन् ॥ ६ ॥ षज्जाग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवै
ति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ७ ॥
षेनकर्म्माण्यपसोमनीषिणोषज्ञेकृण्वन्तिविदथेषुधीराः ॥ षदपूर्व्वंषु
क्षमन्तःप्प्रजानान्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ८ ॥ षत्प्रज्ञानमुत

चेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋतेकिञ्चनक
र्म्मक्रियतेतन्मेमनः शिवसङ्कल्पमस्तु ॥ ९ ॥ येनेदम्भूतम्भुवनम्भ
विष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेम
नः शिवसङ्कल्पमस्तु ॥ १० ॥ यस्मिन्नृचः सामयजूंषियस्मिन्प्र
तिष्ठितारथनाभाविवाराः ॥ यस्मिँश्चित्तंसर्व्वमोतम्प्रजानान्तन्मे
मनः शिवसङ्कल्पमस्तु ॥ ११ ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनी
यतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठँय्यदजिरञ्जविष्ठन्तन्मेमनः शिवस
ङ्कल्पमस्तु ॥ १२ ॥ इतिसंहितायांरुद्रपाठेप्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥

रु. ३ प्पुङ्क्त्यासह ॥ बृहत्युष्णिहाककुप्सूचीभिः शम्यन्तु त्वा ॥ ४ ॥ द्वि
पदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः ॥ विच्छन्दा याश्च सच्छन्दाः
सूचीभिः शम्यन्तु त्वा ॥ ५ ॥ सहस्तोमाः सहच्छन्दस ऽआवृतः सह
प्रमा ऽऋषयः सप्त दैव्याः ॥ पूर्वेषाम्पन्थामनुदृश्य धीरा ऽअन्वालेभि
रे रथ्यो न रश्मीन् ॥ ६ ॥ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवै
ति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ७ ॥
येन कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ॥ यदपूर्वँय्य
क्षमन्तः प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ८ ॥ यत्प्रज्ञानमुत

चेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋतेकिञ्चनक
र्म्मँक्रियतेतन्मेमनः शिवसङ्कल्पमस्तु ॥ ९ ॥ येनेदम्भूतम्भुवनम्भ
विष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेम
नः शिवसङ्कल्पमस्तु ॥ १० ॥ यस्मिन्नृचःसामयजूंषियस्मिन्प्र
तिष्ठितारथनाभाविवाराः ॥ यस्मिँश्चित्तंसर्व्वमोतम्प्रजानान्तन्मे
मनः शिवसङ्कल्पमस्तु ॥ ११ ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनी
यतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनः शिवस
ङ्कल्पमस्तु ॥ १२ ॥ इतिसंहितायांरुद्रपाठेप्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥

सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिर्ठंसर्वतःस्पृत्वात्यति
रु. ४ ष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदर्ठंसर्वंयद्भूतंयच्चभाव्यम् ॥ उता
मृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्या
याँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥
त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्राम
त्साशनानशनेऽअभि ॥ ४ ॥ ततोविराडजायतविराजोऽअधिपूरुषः ॥
सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्व
हुतःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्याग्ग्राम्या

श्चये ॥ ६॥ तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे ॥ छन्दाꣳसि
जज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वाऽअजाय
न्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजाव
यः ॥ ८ ॥ तंयज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ॥ तेनदेवाऽअ
यजन्तसाध्याऽऋषयश्चये ॥ ९ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पय
न् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्म
णोस्यमुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्याꣳशू
द्रोऽअजायत ॥११॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥

श्रोत्त्राद्वायुश्च्चप्प्राणश्च्चमुखादग्निरजायत ॥ १२ ॥ नाब्भ्याऽआसी
रु. ५ दन्तरिक्षꣳशीर्ष्णो द्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्दिशःश्रोत्त्रात्तथालो
काँ २।।ऽअकल्प्पयन् ॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥
वसन्तोस्यासीदाज्ज्यङ्ग्रीष्म्मऽइध्ध्मःशरद्धविः ॥ १४ ॥ सप्ता
स्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञन्तन्न्वानाऽअब
ध्ध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणि
प्प्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्त्रपूर्वेसाध्ध्याःसन्ति
देवाः ॥ १६ ॥ अद्भ्यःसम्भृतःपृथिव्यैरसाच्चविश्वकर्म्मणःसमवर्त्तताग्

ग्ग्रे ॥ तस्यत्वष्टाव्विदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्ग्रे ॥१७॥
व्वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसःपरस्तात् ॥ तमेवव्विदि
त्वातिमृत्युमेतिनान्यःपन्थाव्विद्यतेयनाय ॥ १८ ॥ प्प्रजापतिश्चरति
गर्ब्भेऽअन्तरजायमानोबहुधाव्विजायते ॥ तस्ययोनिम्परिपश्यन्तिधी
रास्तस्मिन्हतस्थुर्ब्भुवनानिव्विश्वा ॥ १९ ॥ योदेवेब्भ्यऽआतपतियो
देवानाम्पुरोहितः ॥ पूर्व्वोयोदेवेब्भ्योजातोनमोरुचायब्राह्मये ॥ २० ॥
रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोव्विद्या
त्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे

पार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मइषाणस
रु. ६ र्वलोकम्मइषाण ॥ २२ ॥ ॥ इतिसंहितायांरुद्रपाठेद्वितीयोऽध्या
यः ॥ २ ॥ ॥ ४ ॥ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्ष
णीनाम् ॥ सङ्क्रन्दनोऽनिमिषऽएकवीरःशतꣳसेनाऽअजयत्साकमि
न्द्रः ॥ १ ॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णु
ना ॥ तदिन्द्रेणजयततत्सहध्वंयुधोनरऽइषुहस्तेनवृष्णा ॥ २ ॥ सऽ
इषुहस्तैःसनिषङ्गिभिर्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥ संसृष्टजि
त्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्पतेपरिदी

यारथेनरक्षोहामित्राँ२॥ऽअपबाधमानः ॥ प्रभञ्जन्त्सेनाःप्रमृणोयु
धाजयन्नस्माकमेद्ध्यवितारथानाम् ॥४॥ बलविज्ञायस्त्थविरःप्रवी
रःसहस्वान्वाजीसहमानऽउग्रः ॥ अभिवीरोऽअभिसत्त्वासहोजाजैत्र
मिन्द्ररथमातिष्ठगोवित् ॥५॥ गोत्राभिदङ्गोविदँवज्रबाहुञ्जयन्तमज्म
प्रमृणन्तमोजसा ॥ इमꣳसजाताऽअनुवीरयद्ध्वमिन्द्रꣳसखायोऽअनु
सꣳरभद्ध्वम् ॥ ६ ॥ अभिगोत्राणिसहसागाहमानोदयोवीरःशतम
न्युरिन्द्रः ॥ दुश्च्यवनःपृतनाषाडयुद्ध्योऽस्माकꣳसेनाऽअवतुप्रयु
त्सु ॥ ७ ॥ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसोमः ॥

रू. ७ देुवसेुनानांमभिभञ्जतुीनाञ्जयंन्तीनाम्मुरुतोयुन्त्वग्ग्रंम् ॥ ८ ॥ इन्द्र
स्युवृष्ष्णुोव्वरुंणस्युराज्ञंऽआदुित्यानांम्मुरुतांछंशर्द्धंऽउुग्ग्रम् ॥ मुहा
मंनसाम्भुवनच्च्यवानांङ्घोषोदेुवानांञ्जयंतामुदंस्त्थात् ॥ ९ ॥ उद्धं
षंयमघवुन्नायुंधान्न्युत्सत्त्वंनाम्मामुकानाम्मनांछंसि ॥ उद्वृत्रहन्नुवा
जिनांव्वाजिनान्न्युद्रथानांञ्जयंतांय्यन्तुघोषाः ॥ १० ॥ अुस्म्माकुमि
न्द्रुःसमृंतेषुध्वुजेष्ष्वुस्म्माकुंय्याऽइषंवुस्ताजंयन्तु ॥ अुस्म्माकंव्वी
राऽउत्तंरेभवन्त्वुस्म्माँ२॥ऽउंदेवाऽअवताहवेषु ॥ ११ ॥ अुमीषांञ्चि
त्तम्प्प्रांतिलोभयंन्तीगृह्णाणाङ्गान्न्यप्प्वेपरेहि ॥ अुभिप्प्रेहिनिर्द्दहहृत्सु

शोकैरुन्धेनुामित्त्रुास्तमंसासचन्ताम् ॥ १२ ॥ अवंसृष्टापरापंतुशर

व्येब्रह्मसंशिते ॥ गच्छामित्रान्प्रपंद्यस्वमामीषांकञ्चुनोच्छिषः

॥ १३ ॥ प्रेतुाजयंतानरऽइन्द्रोवुःशर्म्मयच्छतु ॥ उुग्रावंःसन्तुबाहवो

नाधृष्ष्यायथासंथ ॥ १४ ॥ अुसौय्यासेनामरुतुःपरेषामुभ्यैतिनुऽ

ओजंसुास्पर्द्धमाना ॥ ताङ्गूंहतुतमुसापंव्रतेनुयथामीऽअुन्योऽअुन्य

न्नजुानन् ॥ १५ ॥ यत्रंबुाणाःसुम्पतंन्तिकुमाराविंशिखाऽइंव ॥ तन्नुऽ

इन्द्रोबृहुस्पतिुरदिंतिुःशर्म्मयच्छतुविुश्वाहाशर्म्मयच्छतु ॥ १६ ॥

मर्म्माणितेवर्म्मणाच्छादयामिुसोमंस्त्वुाराजुामृतेनानुंवस्ताम् ॥ उु

रु. ८ रोर्व्वरींयुोव्वरुंणस्तेकृणोतुजयंन्तुन्त्वानुंदेवामंदन्तु ॥ १७ ॥ ॥ इति
सठंहितायांरुद्रजाप्येतृतीयोऽध्यायः ॥ ३ ॥ ॥ ५ ॥ व्विभ्राड्बृह
त्पिबतुसोम्म्यम्मद्धायुर्द्दधद्यज्ञपंतावविंहुतम् ॥ व्वातंजूतोयोऽअंभिर
क्षंतित्मनाप्रजाःपुपोषपुरुधाव्विरांजति ॥ १ ॥ उदुत्यञ्जातवेंदसन्दे
वँव्वहन्तिकेतवं÷ ॥ दृशेव्विश्वांयसूर्य्यम् ॥ २ ॥ येनांपावकचक्षंसाभु
रण्यन्तञ्जनाँ२॥ऽअनु ॥ त्वँव्वंरुणपश्यंसि ॥ ३ ॥ दैव्यांवद्धर्य्यूऽआग
तर्ठंरथेनसूर्य्यत्वचा ॥ मद्ध्वांयज्ञठंसमंञ्जाथे ॥ तम्प्रत्क्नथायँव्वेनश्चि
त्रन्देवानांम् ॥ ४ ॥ तम्प्रत्क्नथांपूर्व्वथांव्विश्वथेमथांज्ज्येष्ठतांतिम्बर्हि

षदꣳस्वर्विदम् ॥ प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु व
र्द्धसे ॥ ५ ॥ अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ॥
इममपाꣳसङ्गमे सूर्यस्य शिशुन्न विप्रा मतिभी रिहन्ति ॥ ६ ॥ चित्र
न्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा द्यावापृथि
वीऽअन्तरिक्षꣳसूर्यऽआत्मा जगतस्तस्थुषश्च ॥ ७ ॥ आ नऽइडा
भिर्विदथे सुशस्ति विश्वानरः सविता देवऽएतु ॥ अपि यथा युवानो मत्स
था नो विश्वं जगदभिपित्वे मनीषा ॥ ८ ॥ यदद्य कच्च वृत्रहन्नुदगाऽअभि
सूर्य ॥ सर्वं तदिन्द्र ते वशे ॥ ९ ॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि

रु. ९ सूर्य्यं ॥ विश्वमाभांसिरोचुनम् ॥ १० ॥ तत्सूर्य्यँस्यदेवुत्वन्तन्महि
त्वम्मुद्ध्याकर्त्तोर्व्विततंतुर्ठ्सञ्जंभार ॥ युदेदयुंक्तुहुरितंः सुधस्थादाद्रात्त्री
व्वासंस्तनुतेसिमस्म्मै ॥ ११ ॥ तन्मित्रस्युव्वरुणस्याभिचक्षेसूर्य्योँरू
पङ्कृणुतेद्योरुपस्थे ॥ अनुन्तमुन्न्यद्रुशंदस्युपाजंः कृष्णमुन्न्यद्धुरितुःस
म्भरान्ति ॥ १२ ॥ बण्णमुहाँ २॥ऽअंसिसूर्य्युबडांदित्यमुहाँ २॥ऽअंसि ॥
मुहस्तैंसुतोमंहिमापंनस्यतुद्धादेंवमुहाँ २॥ऽअंसि ॥ १३ ॥ बट्सू
र्य्युश्श्रवंसामुहाँ २॥ऽअंसिसुत्रादेंवमुहाँ २॥ऽअंसि ॥ मुह्नादेवानांमसु
र्य्यंः पुरोहिंतोव्विभुज्ज्योतिरदांब्भ्यम् ॥ १४ ॥ श्रायंन्तऽइवसूर्य्युँव्वि

श्वोदिन्द्रंस्यभक्षत ॥ त्वसूंनिजातेजनंमानुऽओजंसाप्प्रातीभागन्नदी
धिम ॥ १५ ॥ अद्याद्देवाऽउदिंतासूर्य्यस्यनिरंहंसःपिपृतानिरंव
द्यात् ॥ तन्नोंमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः
॥१६॥ आकृष्णेनरजंसावर्त्तमानोनिवेशयंन्नमृतम्मर्त्यंञ्च ॥ हिरण्ययें
नसवितारथेनादेवोयातिभुवनानिपश्यंन् ॥ १७ ॥ ॥ इति सरंहि
तायांरुद्रपाठेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ५ ॥ ॐ नमंस्तेरुद्रम
न्यवंऽउतोतऽइषंवेनमंः ॥ बाहुभ्यामुततेनमंः ॥ १ ॥ यातेंरुद्रशि
वातनूरघोरापापकाशिनी ॥ तयांनस्तन्वाशन्तंमयागिरिंशन्ताभि

रु. १० चांकशीहि ॥ २ ॥ यामिषुंङ्गिरिशन्तुहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरि
त्रुताङ्कुरुमाहिंठसीःपुरुषुञ्जगत् ॥ ३ ॥ शिवेनुवचसात्वागिरिशाच्छा
वदामसि ॥ यथानुःसर्वुमिज्जगदयुक्ष्मठंसुमनाऽअसत् ॥ ४ ॥ अद्ध्यवो
चदधिवुक्ताप्रथुमोदैव्योभिषक् ॥ अहींश्चुसर्वाञ्जुम्भयुन्त्सर्वाश्चयातु
धान्योधुराचीःपरासुव ॥ ५ ॥ असौयस्ताम्रोऽअरुणऽउतबुभ्रुःसुमु-
ङ्गलः ॥ येचैनठंरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाठंहेडऽईमहे
॥ ६ ॥ असौयोवसर्पतिनीलग्रीवोविलोहितः ॥ उतैनङ्गोपाऽअदृश्रन्न
दृश्रन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तुनीलग्रीवायस

हस्राक्षायमीढुषे ॥ अथोयेऽअंस्युसत्त्वांनोहन्तेभ्योकरन्नमः ॥ ८ ॥
प्रमुंञ्चधन्वंनुस्त्वमुभयोरात्त्वन्योंर्ज्यांम् ॥ याश्चंतेहस्तुऽइषवुःपराता
भंगवोव्वप ॥ ९ ॥ व्विज्ज्यन्धनुःकपर्दिनोव्विशल्योबाणंवाँ २ ॥ ऽउत ।
अनैशन्नस्युयाऽइषवऽआभुरंस्यनिषङ्गधिः ॥ १० ॥ यातेहेतिम्मींढु
ष्टमुहस्तेंबभूवंतेधनुः ॥ तयास्मान्विश्श्वतुस्त्वमयुक्ष्मयापरिंभुज ॥
॥ ११ ॥ परिंतेधन्वंनोहेतिरुस्म्मान्वृंणक्कुविश्श्वतः ॥ अथोयऽइषु
धिस्तवारेऽअुस्म्मन्निधेंहितम् ॥ १२ ॥ अवुतत्त्युधनुष्ट्वंसहंस्राक्षुशते
षुधे ॥ निशीर्य्यंशुल्यानुाम्मुखांशिवोनंःसुमनांभव ॥ १३॥ नमंस्तुऽ

आयुधायानाततायधृष्णवे ॥ उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवध
रु. ११ न्वने ॥ १४ ॥ मानोमहान्तमुतमानोऽअब्भ्भकम्मानऽउक्षन्तमुतमान
ऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातरम्मानःप्प्रियास्तन्वोरुद्द्ररी
रिषः ॥ १५ ॥ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वे
षुरीरिषः ॥ मानोवीरान्रुद्द्रभामिनोवधीर्हविष्मन्तःसदमित्त्वाहवा
महे ॥१६॥ नमोहिरण्यबाहवेसेनान्न्येदिशाञ्चपतयेनमोनमोवृक्षेब्भ्यो
हरिकेशेब्भ्यःपशूनाम्पतयेनमोनमःशष्प्पिञ्जरायत्त्विषीमतेपथीना
म्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबब्भ्लुशा

यं ॥ १७ ॥ नमोबब्भ्लुशायव्व्याधिनेन्नानाम्पतयेनमोनमोभुवस्यहे
त्यैजगताम्पतयेनमोनमोरुद्द्रायाततायिनेक्षेत्त्राणाम्पतयेनमोनमःसू
तायाहन्त्यैव्वनानाम्पतयेनमोनमोरोहिताय ॥ १८ ॥ नमोरोहिताय
स्त्थपतयेव्वृक्षाणाम्पतयेनमोनमोभुवन्तयेव्वारिवस्कृतायौषधीनाम्प-
तयेनमोनमोमन्त्रिणेव्वाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषा
याक्क्रन्दयतेपत्तीनाम्पतयेनमोनमःकृत्स्नाय ॥ १९ ॥ नमःकृत्स्नायत
याधावतेसत्त्वानाम्पतयेनमोनमःसहमानायनिव्व्याधिनऽआव्व्याधि
नीनाम्पतयेनमोनमोनिषङ्गिणेककुभायस्तेनानाम्पतयेनमोनमोनि

चेरवैपरिचरायारण्यानाम्पतयेनमोनमोवञ्चते ॥ २० ॥ नमोवञ्चते
रु. १२ परिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्प
तयेनमोनमःसृकायिभ्योजिघांसद्भ्योमुष्णताम्पतयेनमोनमो
ऽसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः ॥ २१ ॥ नमऽउष्णीषि
णेगिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवो
नमोनमऽआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनमऽआयच्छ
द्भ्योऽस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः ॥ २२ ॥ नमोविसृजद्भ्योवि
ध्यद्भ्यश्चवोनमोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमःशयानेभ्यो

ऽआसीनेब्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभा
ब्भ्यः ॥ २३ ॥ नमः सभाब्भ्यः सभापतिब्भ्यश्च वो नमो नमोऽश्वेब्भ्यो
ऽश्वपतिब्भ्यश्च वो नमो नमऽआव्याधिनीब्भ्यो विविद्ध्यन्तीब्भ्यश्च वो न
मो नमऽउगणाब्भ्यस्तृꣳहतीब्भ्यश्च वो नमो नमो गणेब्भ्यः ॥ २४ ॥ नमो
गणेब्भ्यो गणपतिब्भ्यश्च वो नमो नमो व्रातेब्भ्यो व्रातपतिब्भ्यश्च वो नमो
नमो गृत्सेब्भ्यो गृत्सपतिब्भ्यश्च वो नमो नमो विरूपेब्भ्यो विश्वरूपे
ब्भ्यश्च वो नमो नमः सेनाब्भ्यः ॥ २५ ॥ नमः सेनाब्भ्यः सेनानिब्भ्यश्च
वो नमो नमो रथिब्भ्योऽअरथेब्भ्यश्च वो नमो नमः क्षत्तृब्भ्यः सङ्ग्रहीतृ

भ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ नमस्तक्ष
रु. १३ भ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्म्मारेभ्यश्चवोनमो
नमोनिषादेभ्यःपुञ्जिष्ठेभ्यश्चवोनमोनमःश्वनिभ्योमृगयुभ्यश्च
वोनमोनमःश्वभ्यः ॥ २७ ॥ नमःश्वभ्यःश्वपतिभ्यश्चवोनमोन
मोभवायचरुद्रायचनमःशर्व्वायचपशुपतयेचनमोनीलग्ग्रीवायचाशि
तिकण्ठायचनमःकपर्द्दिने ॥ २८ ॥ नमःकपर्दिनेचव्युप्तकेशायच
नमःसहस्राक्षायचशतधन्न्वनेच ॥ नमोगिरिशयायचाशिपिविष्टाय
चनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ २९ ॥ नमोह्रस्वायचवा

मुनायंचुनमौबृहुतेचुवर्षीयसेचुनमौवृद्धायंचसुवृधेंचुनमोग्र्यांयचप्र
थुमायंचुनमंऽआशवें ॥ ३० ॥ नमंऽआशवेंचाजिरायंचुनमुःशीघ्र्यांय
चुशीभ्यांयचुनमुऽऊर्म्यांयचावस्वन्यायचुनमौनादेयायंचुद्वीप्यां
यच ॥ ३१ ॥ नमौज्येष्ठायंचकनिष्ठायंचुनमंःपूर्वजायंचापरजायंचु
नमौमध्यमायंचापगल्भायंचुनमौजघन्यायचबुध्न्यायचुनमुःसो
भ्यांय ॥ ३२ ॥ नमुःसोभ्यांयचप्रतिसर्यांयचुनमोयाम्यांय
चुक्षेम्यांयचुनमुःश्लोक्यांयचावसान्यायचुनमंऽउर्वर्यांयचुख
ल्यांयचुनमोवन्यांय ॥ ३३ ॥ नमोवन्यांयचुकक्ष्यांयचुनमंःश्रवाय

रु. १४ यंचप्रतिश्श्रवायंचुनमंऽआशुषेणायचाशुरंथायचुनमुःशूरांयचावभे

दिनेचुनमोबिल्मिमनें ॥ ३४ ॥ नमोबिल्मिमनेचकवचिनेचुनमो

वर्म्मिणेचवरूथिनेचुनमंःश्रुतायंचश्रुतसेनायंचुनमोदुन्दुब्भ्यायचा

हनन्यायचुनमोधृष्णवें ॥ ३५ ॥ नमोधृष्णवेचप्प्रमृशायचुनमो

निषुङ्गिणेचेषुधिमतेचुनमंस्तीक्ष्णेषवेचायुधिनेचुनमंःस्वायुधायंचसु

धन्वंनेच ॥ ३६ ॥ नमुःस्रुत्यायचुपत्थ्यायचुनमुःकाटयायचुनी

प्यायचुनमुःकुल्ल्यायचसरस्यायचुनमोनादेयायंचवैशन्तायंचुनमुः

कूप्यायं ॥ ३७ ॥ नमुःकूप्यायचावटयायचुनमोवीद्ध्र्यायचातप्या

यचनमोमेग्घ्यायचविद्युत्त्यायचनमोवर्ष्यायचावर्ष्यायचनमोवा
त्त्याय॥ ३८॥ नमोवात्त्यायचरेष्म्म्यायचनमोवास्तव्व्यायचवास्तुपाय
चनमःसोमायचरुद्रायचनमस्ताम्रायचारुणायचनमःशङ्गवे ॥ ३९ ॥
नमःशङ्गवेचपशुपतयेचनमऽउग्रायचभीमायचनमोऽग्रेवधायचदूरे
वधायचनमोहन्त्रेचहनीयसेचनमोवृक्षेब्भ्योहरिकेशेब्भ्योनमस्तारा
य ॥ ४० ॥ नमःशम्भवायचमयोभवायचनमःशङ्करायचमयस्करा
यचनमःशिवायचशिवतरायच ॥ ४१ ॥ नमःपार्य्यायचावार्य्यायच
नमःप्प्रतरणायचोत्तरणायचनमस्तीर्त्थ्यायचकूल्ल्यायचनमःश

ष्प्प्यांयचफेन्न्यांयचनमं÷सिकुत्त्याय ॥४२॥ नमं÷सिकुत्त्यायचप्प्रवा
रु. १६ ह्य्यायचनम÷किꣳशिलायचक्षयणायचनमं÷कपर्द्दिनेचपुलस्तयेचन
मंऽइरिण्यायचप्प्रपत्थ्यायचनमोव्व्रज्ज्याय ॥४३॥ नमोव्व्रज्ज्यायचगो
ष्ठ्यायचनमस्तल्प्प्यायचगेह्य्यायचनमोहृदय्य्यायचनिवेष्प्प्यायच
नमःकाट्ट्यायचगह्वरेष्ठायचनमःशुष्क्क्याय ॥४४॥ नमःशुष्क्क्यायच
हरित्यायचनमं÷पाꣳसव्यायचरजस्यायचनमोलोप्प्यायचोलप्प्या
यचनमऽऊर्व्व्यायचसूर्व्व्यायचनमं÷पर्ण्णाय ॥४५॥ नमं÷पर्ण्णायचप
र्ण्णशदायचनमंऽउद्गुरमाणायचाभिघ्नतेचनमंऽआखिदतेचप्प्रखिद

तेचुनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाꣳ
हृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमऽआनिर्हते
भ्यः॥४६॥ द्रापेऽअन्धसस्पतेदरिद्रनीललोहित॥आसाम्प्रजानामे
षाम्पशूनाम्माभेर्म्मारोङ्मोचनःकिञ्चनाममत् ॥ ४७ ॥ इमारुद्रायत
वसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमतीः॥यथाशमसद्द्विपदेचतुष्पदेवि
श्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यातेरुद्रशिवातनूःशिवा
विश्वाहाभेषजीशिवारुतस्यभेषजीतयानोमृडजीवसे ॥ ४९ ॥ परि
नोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ॥ अवस्थिरामघ

रु. १६ वंद्धचस्तनुष्वुमीढ्वंस्तोकायुतनंयायमृड ॥ ५० ॥ मीढुंष्टमुशिवंतम
शिवोनं÷सुमनांभव ॥ पुरमेवृक्षऽआयुंधन्निधायकृतिँवसांनुऽआचंरुपि
नांकुम्बिभ्रदागंहि ॥ ५१ ॥ विकिंरिद्रुविलोंहितुनमंस्तेऽअस्तुभगवः ॥
यास्तेंसुहस्रंठहेतयोन्यमुस्म्मान्निवंपन्तुताः ॥ ५२ ॥ सुहस्राणिसहस्रु
शोबाहोस्तवंहेतयं÷॥तासुामीशांनोभगवःपराचीनामुखांकृधि ॥ ५३ ॥
असंङ्ख्यातासुहस्रांणियेरुद्राऽअधिभूम्म्यांम् ॥ तेषांथ्ठंसहस्रयोजुनेवु
धन्वांनितन्मासि ॥ ५४ ॥ अंस्मिमन्महुत्यूर्णवेन्तारिंक्षेभुवाऽअधिं ॥
तेषांथ्ठंसह० ॥ ५५ ॥ नीलंग्ग्रीवाःशितिकण्ठादिवंठरुद्राऽउपांश्रिताः ॥

तेषां० ॥ ५६ ॥ नीलग्ग्रीवाःशितिकण्ठाःशर्व्वाऽअधःक्षमाचराः ॥
तेषां० ॥ ५७ ॥ येवृक्षेषुशष्पिञ्जरानीलग्ग्रीवाव्विलोहिताः ॥ तेषां०
॥ ५८ ॥ येभूतानामधिपतयोव्विशिखासःकपर्द्दिनः ॥ तेषां० ॥ ५९ ॥
येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्य्युधः ॥ तेषां० ॥ ६० ॥ येतीर्त्थानि
प्प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषां० ॥ ६१ ॥ येन्नेषुव्विविद्ध्यन्ति
पात्त्रेषुपिबतोजनान् ॥ तेषां० ॥ ६२ ॥ यऽएतावन्तश्चभूयांसश्चदि
शोरुद्द्रावितस्त्थिरे ॥ तेषां० ॥ ६३ ॥ नमोस्तुरुद्द्रेभ्योयेदिवियेषां
व्वर्षमिषवः ॥ तेभ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीची

रु. १७ र्द्दशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोय
श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेब्भ्योयेन्तरिक्षेयेषां
वातऽइषवः ॥ तेब्भ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीची
र्द्दशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मो
यश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६५ ॥ नमोस्तुरुद्रेब्भ्योयेपृथिव्व्यां
येषामन्नमिषवः ॥ तेब्भ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशो
दीचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्वि
ष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६६ ॥ इतिसंहितायांरुद्र

पाठेपञ्चमोऽध्यायः ॥५॥ ॥छ॥ ॥ पुनर्नमस्ते इत्यादिषोडश काण्डि
काः पठनीयाः ॥ १६ ॥ एषतेरुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहै
षतेरुद्रभागऽआखुस्तेपशुः ॥ १ ॥ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् ॥ य
थानोवस्यसस्करद्यथानःश्रेयसस्करद्यथानोव्यवसाययात् ॥ २ ॥ नम
स्तेरुद्रमन्यवऽउतोतऽइषवेनमः ॥ बाहुभ्यामुततेनमः ॥ ३ ॥ यातेरुद्र
शिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभि
चाकशीहि ॥ ४ ॥ नतम्विदाथयऽइमाजजानान्यद्युष्माकमन्तरम्बभूव ।
नीहारेणप्रावृताजल्प्याचासुतृपऽउक्थशासश्चरन्ति ॥ ५ ॥ विश्वकर्म्मा

रु. १८ ह्यसर्जंनिष्ट्रदेवऽआदिद्रंन्धुर्व्वौऽअभवद्धितीयः ॥ तृतीयःपिताजंनितौष
धीनामुपाङ्गर्भंभुँव्यदधात्पुरुत्रा ॥ ६ ॥ मीढुंष्टमुशिवंतमशिवोनंःसुम
नाभव ॥ पुरमेवृक्षऽआयुधन्निधायुकृत्तिंवसांनुऽआचंरुपिनांकुम्बिभ्र
दागंहि ॥७॥ विकिरिद्रुविलोंहितुनमंस्तेऽअस्तुभगवः ॥ यास्तेसुहस्रं
ठंहेतयोन्यमुस्म्मान्निवंपन्तुताः ॥ ८ ॥ सुहस्राणिसहस्रुशोबाह्वोस्तव
हेतयंः ॥ तासामीशांनोभगवःपराचीनामुखांकृधि ॥ ९ ॥ असं
ख्याताःसुहस्राणियेरुद्राऽअधिभूम्यांम् ॥ तेषांठंसहस्रयोजुनेवधु
न्वांनितन्मसि ॥ १० ॥ व्युयठंसोमव्रुतेतवमनंस्तनूषुविभ्रतः ॥ प्रुजा

वंन्तःसचेमहि ॥ ११ ॥ एषतेंरुद्रभागःसुहस्वस्त्राम्बिकयातञ्जुषस्व
स्वाहैषतेंरुद्रभागऽआखुस्तेंपशुः ॥ १२ ॥ अवरुद्रमदीमह्यवंदेवन्त्र्य
म्बकम् ॥ यथानोवस्यंसस्करद्यथांनःश्रेयंसस्करद्यथांनोव्यवसाय
यांत् ॥ १३ ॥ भेषजमसिभेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मे
षायंमेष्यै ॥१४॥ त्र्यम्बकँयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारु
कमिवबन्धनान्मृत्योर्मुंक्षीयमामृतात् ॥१५॥ त्र्यम्बकँयजामहेसुग
न्धिम्पंतिवेदनम् ॥ उर्वारुकमिवबन्धनादितोमुंक्षीयमामुतः ॥१६॥
एतत्तेरुद्रावसन्तेनपरोमूजवतोतीहि।अवततधन्वापिनाकावसःकृत्ति

रु. १९ वासुऽआहिꣳसन्नःशिवोतीहि ॥ १७ ॥ त्र्यायुषञ्जमदग्नेःकश्यप
स्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥१८॥ शिवोना
मासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीः ॥ निवर्त्तयाम्म्या
युषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्य्याय ॥१९॥
उग्रश्चभीमश्चध्वान्तश्चधुनिश्च ॥ सासह्वाँश्चाभियुग्वाचविक्षिपःस्वा
हा ॥२०॥ अग्निꣳहृदयेनाशनिꣳहृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेनभ
वँय्यक्ना ॥ शर्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तःपर्शव्ये
नोग्रन्देवँव्वनिष्ठुनावसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ॥२१॥ उग्रँल्लोहि

तेनमित्त्रस्यसौष्ठ्यंत्येनरुद्रन्दौर्ष्ठ्यत्येनेन्द्रम्प्रक्रीडेनमरुतोबलेनसाद्ध्या

न्प्रमुदा॥भवस्यकण्ठ्यंरुद्रस्यान्तःपार्श्व्यम्महादेवस्ययकृच्छर्व

स्यवनिष्ठुःपशुपतेःपुरीतत्॥२२॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनः

पूषाविश्ववेदाः॥ स्वस्तिनस्ताक्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पति

र्द्दधातु॥२३॥पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः

॥पयस्वतीःप्रदिशःसन्तुमह्यम् ॥ २४ ॥ विष्णोरराटमसिविष्णोः

श्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवे

त्वा॥२५॥अग्निर्द्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवतावसवोदेव

तांरुद्रादेवतांदित्यादेवतांमरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवते
रु. २० न्द्रोदेवताव्वरुणोदेवता॥२६॥ द्यौःशान्तिरन्तरिक्षठंशान्तिःपृथिवीशा
न्तिरापःशान्तिरोषधयःशान्तिः ॥ व्वनस्पतयःशान्तिर्विश्वेदेवाःशा
न्तिर्ब्रह्मशान्तिःसर्व्वठंशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥
॥२७॥इतिसंहितायांरुद्रपाठेषष्ठोऽध्यायः॥ ६ ॥ ७ ॥व्वाजश्चमेप्रस
वश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेक्रतुश्चमेस्वरश्चमेश्लोकश्च
मेश्रवश्चमेश्रुतिश्चमेज्योतिश्चमेस्वश्चमेयज्ञेनकल्पन्ताम् ॥ १ ॥
प्राणश्चमेपानश्चमेव्यानश्चमेसुश्चमेचित्तश्चमऽआधीतश्चमेव्वाक्चमे

मनश्चमेचक्षुश्चमेश्श्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् ॥२॥
ओजश्चमेसहश्चमऽआत्माचमेतनूश्चमेशर्म्मचमेवर्म्मचमेङ्गानिच
मेस्थीनिचमेपरूꣳषिचमेशरीराणिचमऽआयुश्चमेजराचमेयज्ञेनक
ल्पन्ताम् ॥ ३ ॥ ज्यैष्ठ्यञ्चमऽआधिपत्यञ्चमेमन्युश्चमेभामश्चमे
मश्चमेम्भश्चमेजेमाचमेमहिमाचमेवरिमाचमेप्प्रथिमाचमेवर्षिमा
चमेद्राघिमाचमे वृद्धञ्चमेवृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥ ४ ॥ सुत्य
श्च॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः॥ सुत्य
श्चमेश्श्रद्धाचमेजगच्चमेधनञ्चमेविश्वञ्चमेमहश्चमेक्क्रीडाचमेमोदश्च

रु. २१ मेजातश्चंमेजनिष्यमाणश्चमेसूक्तश्चंमेसुकृतश्चंमेयज्ञेनंकल्पन्ताम्॥
॥ ५ ॥ ऋतश्चंमुमृतंश्चमेयुक्ष्मश्चुमेनामयच्चमेजीवातुंश्चमेदीर्घायु
त्वश्चंमेनमित्रश्चुमेभयंश्चमेसुषश्चंमुशयंनश्चमेसूषाश्चमेसुदिनश्चमेयु
ज्ञेनंकल्पन्ताम् ॥ ६ ॥ युन्ताचंमेधुर्त्ताचंमुक्षेमंश्चमुधृतिंश्चमुविश्वंश्च
मुमहंश्चमेसुम्विच्चंमुज्ञात्रंश्चमुसूश्चमेप्प्रसूश्चमुसीरंश्चमुलयंश्चमेयुज्ञे
नंकल्पन्ताम्॥७॥शश्चंमुमयंश्चमोप्प्रियश्चंमेनुकामश्चंमुकामंश्चमेसौ
मनुसश्चंमुभगंश्चमुद्रविणश्चमेभुद्रश्चंमुश्श्रेयश्चमुवसीयश्चमुयशंश्चमे
युज्ञेनंकल्पन्ताम्॥८॥ऊक्कचं॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नम

काध्यायःपठनीयः ॥ ऊर्क्चमेसूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधु
चमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऽऔद्भिद्यञ्चमे
यज्ञेनकल्पन्ताम्॥९॥रयिश्चमेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेविभुचमेप्र
भुचमेपूर्ण्णञ्चमेपूर्ण्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञेनक
ल्पन्ताम् ॥ १० ॥ वित्तञ्चमेवेद्यञ्चमेभूतञ्चमेभविष्यच्चमेसुगञ्चमे
सुपथ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमतिश्चमेसुम
तिश्चमेयज्ञेनकल्पन्ताम्॥११॥व्रीहयश्चमेयवाश्चमेमाषाश्चमेतिला
श्चमेमुद्गाश्चमेखल्वाश्चमेप्रियङ्गवश्चमेणवश्चमेश्यामाकाश्चमेनी

रु. २२ वारांश्च मे गोधूमांश्च मे मुसूरांश्च मे यज्ञेनं कल्पन्ताम् ॥ १२ ॥ अश्मा
च॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः ॥ अश्मा
च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरं
ण्यञ्च मेयश्च मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपुं च मे यज्ञेनं कल्पन्ताम्
॥ १३ ॥ अग्निश्च मऽआपश्च मे वीरुधश्च मऽओषधयश्च मे कृष्टपच्याश्च
मे कृष्टपच्याश्च मे ग्राम्याश्च मे पशवंऽआरण्याश्च मे वित्तञ्च मे वित्ति
श्च मे भूतञ्च मे भूतिश्च मे यज्ञेनं कल्पन्ताम् ॥ १४ ॥ वसुं च मे वसतिश्च
मे कर्मं च मे शक्तिश्च मेर्थश्च मऽएमश्च मऽइत्या च मे गतिश्च मे यज्ञेनं क

ल्पन्ताम् ॥१५॥ अग्निश्चं मुऽइन्द्रश्चं ॥ 'नमस्त' इत्यादि ६६ मन्त्रात्म
को नमकाध्यायः पठनीयः ॥ अग्निश्चं मुऽइन्द्रंश्च मेसोमंश्च मुऽइन्द्रंश्च
मेसवितांचंमुऽइन्द्रंश्च मेसरंस्वतीचमुऽइन्द्रंश्च मेपूषाचंमुऽइन्द्रंश्च मेबृ
हस्पतिंश्च मुऽइन्द्रश्च मेयज्ञेनंकल्पन्ताम् ॥१६॥ मित्रश्चं मुऽइन्द्रंश्च मेव
रुणश्च मुऽइन्द्रंश्च मेधाताचंमुऽइन्द्रंश्च मेत्त्वष्टांचमुऽइन्द्रंश्च मेमुरुतंश्च
मुऽइन्द्रश्च मेविश्वेंचमेदेवाऽइन्द्रंश्च मेयज्ञेनंकल्पन्ताम् ॥१७॥ पृथिवी
चमुऽइन्द्रंश्च मेन्तरिंक्षश्चमुऽइन्द्रंश्च मेद्यौश्चंमुऽइन्द्रंश्च मेसामांश्च मुऽइ
न्द्रंश्च मेनक्षंत्राणिचमुऽइन्द्रंश्च मेदिशंश्च मुऽइन्द्रंश्च मेयज्ञेनंकल्पन्ता

म्॥१८॥अंशुश्च॥'नमस्ते'इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठ
रु. २३ नीयः। अंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपांशुश्च मेऽन्त
र्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्था
नश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१९॥ आग्रयणश्च मे वै
श्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरु
त्वतीयाश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च
मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२०॥ स्रुचश्च मे चमसाश्च मे वाय
व्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च म आध

वृनीयंश्च मुेद्वेदिंश्च मेबुर्हिंश्च मेवभृथश्च मेस्वगाकुारश्च मेयुज्ञेनंकल्पप
न्ताम् ॥ २१ ॥ अुग्निश्च मेघुर्म्मश्च ॥ 'नमस्ते' इत्यादि ६६ म
न्त्रात्मको नमकाध्यायः पठनीयः॥अुग्निश्च मेघुर्म्मश्च मुेर्कश्च मुेसूर्य्यं
श्च मेप्प्राणश्च मेश्वमुेधश्च मेपृथिुवीचुमेदितिश्च मुेदितिश्च मुेद्यौश्च मुेऽङ्गु
लंयुःशक्वंकरयोुदिशश्च मेयुज्ञेनंकल्पन्ताम् ॥ २२ ॥ व्रुतश्चमऽऋु
तवंश्च मुेतपंश्च मेसम्वत्सुरश्च मेहोरुात्रेऽऊर्व्वष्ठीवेबृहद्द्रथन्तुरेचंमेयुज्ञेनं
कल्पन्ताम् ॥ २३ ॥ एकांच ॥ 'नमस्ते'इत्यादि ६६ मन्त्रा
त्मको नमकाध्यायः पठनीयः ॥ एकांचमेतिुस्रश्चंमेतिुस्रश्च मुेपश्चंच

रु. २४ मुपञ्चंचमेसुप्तचंमेसुप्तचंमुनवचमुनवंचमुऽएकादशचमुऽएकादश
चमुत्रयोंदशचमुत्रयोंदशचमुपञ्चंदशचमुपञ्चंदशचमेसुप्तदशचमेसु
प्तदंशचमुनवंदशचमुनवंदशचमुऽएकंविꣳशतिश्चमुऽएकंविꣳशति
श्चमुत्रयोंविꣳशतिश्चमुत्रयोंविꣳशतिश्चमुपञ्चंविꣳशतिश्चमुपञ्चविꣳ
शतिश्चमेसुप्तविꣳशतिश्चमेसुप्तविꣳशतिश्चमुनवंविꣳशतिश्चमुनव
विꣳशतिश्चमुऽएकांत्रिꣳशच्चमुऽएकंत्रिꣳशच्चमुत्रयंस्त्रिꣳशच्चमेयुज्ञेन
कल्पन्ताम् ॥ २४ ॥ चतंस्रश्च ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्म
को नमकाध्यायः पठनीयः ॥ चतंस्रश्चमुष्टौचंमुष्टौचंमुद्वादंशचमुद्वा

दशश्चमेषोडशश्चमेषोडशश्चमेविर्ठ॒ंशतिश्च मेविर्ठ॒ंशतिश्चमेचतुर्विर्ठ॒ंश
तिश्चमेचतुर्विर्ठ॒ंशतिश्चमेष्टाविर्ठ॒ंशतिश्चमेष्टाविर्ठ॒ंशतिश्चमेद्वात्रिर्ठ॒ंश
च्चमेद्वात्रिर्ठ॒ंशच्चमेषट्त्रिर्ठ॒ंशच्चमेषट्त्रिर्ठ॒ंशच्चमेचत्त्वारिर्ठ॒ंशच्चमेचत्त्वा
रिर्ठ॒ंशच्चमेचतुश्चत्त्वारिर्ठ॒ंशच्चमेचतुश्चत्त्वारिर्ठ॒ंशच्चमेष्टाचत्वारिर्ठ॒ंश
च्चमेयज्ञेनकल्पन्ताम् ॥ २५ ॥ त्र्यविश्च ॥ 'नमस्ते' इत्यादि ६६म
न्त्रात्मको नमकाध्यायः पठनीयः॥त्र्यविश्चमेत्र्युवीचमेदित्यवाट्चमे
दित्यौहीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्य्य
वाट्चमेतुर्य्यौहीचमेयज्ञेनकल्पन्ताम् ॥ २६ ॥ पष्ठवाट्चमेपष्ठौ

रु. २६ हीचंमऽउुक्षाचंमेव्वुशाचंमऽऋषुभश्चंमेव्वेहच्चंमेनुड्वाँश्चंमुधेनुंश्चमेयुज्ञेनं
कल्पन्ताम् ॥ २७ ॥ व्वाजांयुस्वाहा ॥ अत्र "गणानान्त्वा" इत्यत
आरभ्य नमकाध्यायन्तमध्यायपञ्चकं पठनीयम् ॥ व्वाजांयुस्वाहांप्प्रसु
वायुस्वाहांपिजायुस्वाहाक्रतंवेुस्वाहाव्वसंवेुस्वाहांहुर्प्पंतंयेुस्वाहाह्नेंमु
ग्धायुस्वाहांमुग्धायंव्वैनंशिनायुस्वाहाव्विनुंशिनंऽआन्त्यायुनायु
स्वाहान्त्यांयभौवुनायुस्वाहाभुवंनस्युपतंयेुस्वाहाधिंपतयेुस्वाहांप्प्रु
जापंतयेुस्वाहां ॥ इुयन्तेुराण्मुत्रायंयुन्तासियुमंनऽऊर्जेत्वाुवृष्ट्यैंत्वा
प्प्रुजानान्त्वाधिंपत्याय ॥ २८ ॥ आयुर्युज्ञेनंकल्पताम्प्प्राणोयुज्ञेनं

कल्प्पताञ्चक्षुर्य्युज्ञेनंकल्प्पताꣳश्श्रोत्त्रँय्युज्ञेनंकल्प्पताम्वाग्ग्युज्ञेनंक
ल्प्पताम्मनोयुज्ञेनंकल्प्पतामात्त्मायुज्ञेनंकल्प्पताम्ब्रुह्ममायुज्ञेनंक
ल्प्पताञ्ज्योतिर्य्युज्ञेनंकल्प्पताꣳस्वर्य्युज्ञेनंकल्प्पताम्पृष्ठँय्युज्ञेनंक
ल्प्पताँय्युज्ञोयुज्ञेनंकल्प्पताम्॥स्तोमश्श्चुयजुश्श्चुऽऋक्कचुसामंचबृहच्चरं
थन्तरञ्चं ॥ स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेःप्प्रजाऽअभूमुवेट्
स्वाहा ॥ २९ ॥ इतिसꣳहितायांरुद्रपाठेसप्त० ॥७॥ ऋचुंवाचुम्प्प्रपद्द्ये
मनोयजुःप्प्रपद्द्येसामप्प्राणम्प्प्रपद्द्येचक्षुःश्श्रोत्त्रम्प्प्रपद्द्येवागोजःसुहौ
जोमयिप्प्राणापानौ ॥ १ ॥ यन्मेच्छिद्रञ्चक्षुषोहृदयस्युमनसोवाति

तृण्णम्बृहस्प्पातिर्म्मुतद्दधातु ॥शन्नोंभवतुभुवंनस्युयस्प्पातिः॥२॥भूर्भु
रु. २६ वुःस्वःतत्संवितुर्व्वरेण्ण्युम्भग्गोदुवस्यंधींमाहिधियुोयोनःप्प्रचोदयात्
॥३॥ कयांनाश्चित्र्ऽआभुंवदूतीसुदावृंधुःसखां॥कयाशचिष्ट्वयावृता ।४।
कस्त्वांसुत्योमदांनुाम्म्मर्ठ्ठोहिष्ठोमत्सुदन्धंसः॥दृढाचिंदारुजेव्वसु॥५॥
अभीषुणुःसखींनामवितार्जरितृणाम् ॥ शुतम्भंवास्यूतिर्भिः ॥ ६ ॥
कयात्त्वन्नंऽऊत्त्याभिप्प्रमंन्दसेव्वृषन् ॥ कयांस्तुोतृब्भ्युऽआभंर ॥७॥
इन्द्रोंव्विश्श्वंस्यराजति ॥ शन्नोंऽअस्तुद्विपदुेशश्चतुंष्पदे ॥ ८ ॥ शन्नों
मित्त्रःशव्वरुणुंःशन्नोंभवत्त्वर्य्युमा ॥ शन्नुऽइन्द्रोबृहस्पतिुःशन्नुाव्विष्णुं

रुरुक्रमः ॥ ९ ॥ शन्नोवातः पवताꣳ शन्नस्तपतु सूर्य्यः ॥ शन्नः कनि
क्रदद्देवः पर्ज्जन्यो ऽअभिवर्षतु ॥ १० ॥ अहानि शम्भवन्तु नः शꣳ रात्रीः प्र
तिधीयताम् ॥ शन्न ऽइन्द्राग्नी भवतामवोभिः शन्न ऽइन्द्रावरुणा रातह
व्या ॥ शन्न ऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शंय्योः ॥ ११ ॥
शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः ॥ १२ ॥
स्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म्म सप्रथाः ॥ १३ ॥
आपो हि ष्ठा मयो भुवस्ता न ऽऊर्ज्जे दधातन ॥ महे रणाय चक्षसे ॥ १४ ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥ १५ ॥

रु. २७ तस्म्मा॒ऽअरं॑ङ्गमामवोयस्युक्षयांयुजिन्न्वंथ ॥ आपौजुनयंथाचनः१६॥
द्यौःशान्तिरुन्तरिंक्षुठंशान्तिः पृथिवीशान्तिरापुःशान्तिरोषंधयुःशा
न्तिः ॥ व्वनुस्पतंयुःशान्तिर्व्विश्वैदेवाःशान्तिर्ब्रह्मुशान्तिःसर्व्वुठंशा
न्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥ १७ ॥ दृतेदृठंहमामित्रस्यं
माचक्षुंषासर्व्वांणिभूतानिसमींक्षन्ताम् ॥ मित्रस्याहञ्चक्षुंषासर्व्वांणिभू
तानिसमींक्षे ॥ मित्रस्युचक्षुंषासमींक्षामहे ॥ १८ ॥ दृतेदृठंहमाज्ज्यो
क्कैसुन्दृशिंजीव्यासुञ्ज्योक्कैसुन्दृशिंजीव्यासम् ॥ १९ ॥ नमंस्तेहरं
सेशोचिषेनमंस्तेऽअस्त्वुर्च्चिषे ॥ अन्न्यांस्तेऽअस्मत्तंपन्तुहेतयंःपावु

कोऽअस्म्मब्भ्यंर्ठंशिवाभव ॥२०॥ नमस्तेऽअस्तुविद्द्युतेनमंस्तेस्तन
यित्त्नवें॥नमंस्तेभगवन्नस्तुयतुःस्वःसुमीहंसे ॥२१॥ यतोंयतःसुमीहं
सेततोंनोऽअभंयङ्कुरु ॥शन्नंःकुरुप्प्रजाब्भ्योभंयन्नःप्रशुब्भ्यंः ॥ २२॥
सुमित्त्रियानुऽआपुऽओषंधयःसन्तुदुर्म्मित्त्रियास्तस्म्मैसन्तुयोस्म्मा
न्द्वेष्ट्टियश्चंवयन्द्विष्म्मः ॥२३॥ तच्चक्षुर्द्देवहिंतम्पुरस्ताच्छुक्क्रमुच्चंरत्॥
पश्येमशुरदंःशुतञ्जीवेंमशुरदंःशुतर्ठंशृणुंयामशुरदंःशुतम्प्रब्रंवामशु
रदंःशुतमदीनाःस्यामशुरदंःशुतम्भूयंश्च्चशुरदंःशुतात् ॥ २४ ॥
इतिसर्ठंहितायांरुद्द्रपाठेऽष्टमोऽध्यायः ॥८॥ ॥ॐ नमः शिवाय ॥

॥ इति श्रीजयपुरनिवासिपंडितश्रीमाधवप्रसादकृतसव्यवस्थाशोधमा रुद्री समाप्ता ॥

रु. २८ ॥ श्रीगणेशायनमः ॥ ॥ जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरी-वि
लोलवीचिवल्लरीविराजमानमूर्धनि ॥ धगद्धगद्धगज्ज्वलल्ललाटपट्टपा
वके किशोरचंद्रशेखरेरतिःप्रतिक्षणंमम ॥ १ ॥ धराधरेंद्रनंदिनीवि
लासबंधुबंधुर-स्फुरद्दिगंतसंततिप्रमोदमानमानसे ॥ कृपाकटाक्षधो
रणीनिरुद्धदुर्धरापदि क्वचिद्विदंबरेमनोविनोदमेतुवस्तुनि ॥ २ ॥ ज
टाभुजंगपिंगलस्फुरत्फणामणिप्रभा-कदंबकुंकुमद्रवप्रलिप्तदिग्वधूमु
खे ॥ मदांधसिंधुरस्फुरत्त्वगुत्तरीयमेदुरे मनोविनोदमद्भुतंबिभर्तुभूत
भर्तरि ॥ ३ ॥ सहस्रलोचनप्रभृत्यशेषलेखशेखर-प्रसूनधूलिधोरणीवि

धूसरांघ्रिपीठभूः ॥ भुजंगराजमालयानिबद्धजाटजुटकः श्रियेचिराय
जायतांचकोरबंधुशेखरः ॥ ४ ॥ ललाटचत्वरज्वलद्धनंजयस्फुलिंग
भा-निपीतपंचसायकंनमन्निलिंगनायकम् ॥ सुधामयूखलेखयाविरा
जमानशेखरं महःकपालिसंपदेशिरोजटालमस्तुनः ॥ ५ ॥ करालभाल
पट्टिकाधगद्धगद्धगज्ज्वल-द्धनंजयाधरीकृतप्रचंडपंचसायके ॥ धराध
रेंद्रनंदिनीकुचाग्रचित्रपत्रक-प्रकल्पनैकशिल्पिनित्रिलोचनेमतिर्मम
॥ ६ ॥ नवीननमेघमंडलीनिरुद्धदुर्धरस्फुरत्-कुहूनिशीथिनीतमःप्रबंध
पंधुकंधरः ॥ निलिम्पानिर्झरीधरस्तनोतुकृत्तिसिंधुरः कलानिधानबं

पृ. २९ धुरः श्रियं जगद्धुरंधरः ॥ ७ ॥ प्रफुल्लनीलपंकजप्रपंचकालिमच्छटा-वि
डंबिकंठकंधरारुचिप्रबंधकंधरम् ॥ स्मरच्छिदं पुरच्छिदं भवच्छिदं म
खच्छिदं गजच्छिदांधकच्छिदंतमंतकच्छिदं भजे ॥ ८ ॥ अगर्वसर्व
मंगलाकलाकदम्बमंजरी-रसप्रवाहमाधुरीविजृंभणामधुव्रतम् ॥ स्म
रांतकं पुरांतकं भवांतकं मखांतकं गजांतकांधकांतकंतमंतकांतकं भजे
॥ ९ ॥ जयत्वदभ्रविभ्रमभ्रमद्भुजंगमस्फुरद्-धगद्धगद्विनिर्गमत्कराल
भालहव्यवाट् ॥ धिमिद्धिमिद्धिमिद्ध्वनन्मृदंगतुंगमंगल-ध्वनिक्रमप्रव
र्तितप्रचण्डताण्डवः शिवः ॥ १० ॥ दृषद्विचित्रतल्पयोर्भुजंगमौक्ति

कस्रजोर्वरिष्ठरत्नलोष्ठयोःसुहृद्विपक्षपक्षयोः ॥ तृणारविंदचक्षुषोःप्र
जामहीमहेन्द्रयोः समंप्रवर्तयन्मनःकदासदाशिवंभजे ॥ ११ ॥ कदा
निलिंपनिर्झरीनिकुंजकोटरेवसन् विमुक्तदुर्मतिःसदाशिरःस्थमंज
लिंवहन् ॥ विमुक्तलोललोचनोललामभाललग्नकः शिवेतिमंत्रमुच्चर
न्कदासुखीभवाम्यहम् ॥ १२ ॥ इदंहिनित्यमेवमुक्तमुत्तमोत्तमंस्त
वं पठन्स्मरन्ब्रुवन्नरोविशुद्धिमेतिसंततम् ॥ हरेगुरौसुभक्तिमाशुया
तिनाऽन्यथागतिं विमोहनंहिदेहिनांसुशंकरस्यचिंतनम् ॥ १३ ॥
पूजाऽवसानसमयेदशवक्त्रगीतं यःशंभुपूजनमिदंपठतिप्रदोषे ॥ त

स्यस्थिरांरथगजेंद्रतुरंगयुक्तां लक्ष्मींसदैवसुमुखींप्रददातिशंभुः १४॥
रु. ३० इति श्रीरावणविरचितं शिवतांडवस्तोत्रं संपूर्णम् ॥ ॥ ॥
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयो
पभोगरचना निद्रा समाधिस्थितिः॥ संचारः पदयोः प्रदक्षिणविधिः
स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलंशंभोतवाराधनम् १

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८

इति

शुक्लयजुर्वेदीयषडङ्गरुद्राष्टाध्यायी

समाप्ता ।

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS